एवं बलिप्रदानस्य क्रमो रूपन्तथैव च ।
कथितो रुधिराध्याय उपचारान् प्रशृणुष्व मे ॥”
इति कालिकापुराणे ६६ अध्यायः ॥

बलिदाननिषेधो यथा,—
“जीवानुकम्पां विज्ञातुं ततो दुर्गां सदाशिवः ।
पप्रच्छ परमप्रीत्या गूढ़मेतद्वचो मुदा ॥
सर्व्वे विष्णुमया जीवास्त्वद्भक्ताश्च कथं शिवे ! ।
श्रुतं मया तवोद्देशे कुर्य्युः कामनया वधम् ।
महान् सन्देह इति मे ब्रूहि भद्रे ! सुनिश्चितम् ॥
शाङ्करी तद्वचः श्रुत्वा शिववक्त्रविनिर्गतम् ।
भीतात्यन्तं हि ब्रह्मर्षे ! प्रत्युवाच सदाशिवम् ॥
श्रीपार्व्वत्युवाच ।
ये ममार्च्चनमित्युक्ता प्राणिहिंसनतत्पराः ।
तत्पूजनं ममामेध्यं यद्दोषात्तदधोगतिः ॥
मदर्थे शिव ! कुर्व्वन्ति तामसा जीवघातनम् ।
आकल्पकोटिनिरये तेषां वासो न संशयः ॥
मम नाम्नाथवा यज्ञे पशुहत्यां करोति यः ।
क्वापि तन्निष्कृतिर्नास्ति कुम्भीपाकमवाप्नुयात् ॥
दैवे पैत्रे तथात्मार्थे यः कुर्य्यात् प्राणिहिंसनम् ।
कल्पकोटिशतं शम्भो ! रौरवे स वसेत् ध्रुवम् ॥
यो मोहान्मानसैर्द्देहिहत्यां कुर्य्यात् सदाशिव ! ।
एकविंशतिकल्पस्य तत्तद्योनिषु जायते ॥
यज्ञे यज्ञे पशून हत्वा कुर्य्यात् शोणितकर्द्दमम् ।
स पचेन्नरके तावद्यावल्लोमानि तस्य वै ॥
हन्ता कर्त्ता तथोत्सर्गकर्त्ता धर्त्ता तथैव च ।
तुल्या भवन्ति सर्व्वे ते ध्रुवं नरकगामिनः ॥
ममोद्देशे पशून् हत्वा सरक्तं पात्रमुत्सृजेत्
यो मूढ़ः स तु पूयोदे वसेद्‌यदि न संशयः ॥
देवतान्तरमन्नाम्नयाजेन स्वेच्छया तथा ।
हत्वा जीवांश्च यो भक्षेत् नित्यं नरकमाप्नुयात् ॥
यूपे बद्धा पशून् हत्वा यः कुर्य्याद्रक्तकर्द्दमम् ।
तेन चेत् प्राप्यते स्वर्गो नरकं केन गम्यते ॥
उपदेष्टा वधे हन्ता कर्त्ता धर्त्ता च विक्रयी ।
उत्सर्गकर्त्ता जीवानां सर्व्वेषां नरकं भवेत् ॥
मध्यस्थस्य वधायापि प्राणिनां क्रयविक्रये ।
तथा द्रष्टुश्च सूनायां कुम्भीपाको भवेद्‌ध्रुवम् ॥
स्वयं कामाशयो भूत्वा योऽज्ञानेन विमोहितः ।
हन्त्यन्यान् विविधान् जीवान् कुर्य्यान्मन्नाम शङ्कर ! ॥
तन्नाश्यवंशसम्पत्तिज्ञातिदारादिसम्पदाम् ।
अचिराद्वै भवेन्नाशो मृतः स नरकं व्रजेत् ॥
देवयज्ञे पितृश्राद्धे तथा माङ्गल्यकर्म्मणि ।
तस्यैव नरके वासो यः कुर्य्याज्जीवघातनम् ॥”
तथा ।
“मद्‌यागेन पशून् हत्वा यो भक्षेत् सह बन्धुभिः ।
तन्नात्रलोमसंख्याब्दैरसिपत्रवने वसेत् ॥
आवयोरन्यदेवानां नाम्ना च परकर्म्मणि ।
यः संपोष्य पशून् हन्यात् सोऽन्धतामिस्रमाप्नुयात् ॥
पशून् हत्वा तथा त्वां मां योऽर्च्चयेन्मांसशोणितैः ।
तावत्तन्नरके वासो यावच्चन्द्रदिवाकरौ ॥
निर्व्विह्निभस्तनुक्तं तन् बहुदर्थेण यत् कृतम् ।
यस्मिन् यज्ञे प्रभो शम्भो ! जीवहत्या भवेद्‌ ध्रुवम् ॥
यज्ञमारभ्य चेत् शक्रः कुर्य्याद्वै पशुघातनम् ।
स तदाधोगतिं गच्छेदितरेषाञ्च का कथा ॥
आवयोः पूजनं मोहाद्‌ये कुर्य्युर्मांसशोणितैः ।
पतन्ति कुम्भीपाके ते भवन्ति पशवः पुनः ॥
फलकामास्तु वेदोक्तैः पशोरालभनं मखे ।
पुनस्तत्तत् फलं भुक्त्वा ये कुर्व्वन्ति पतन्त्यधः ॥
स्वर्गकामोऽश्वमेधं यः करोति निगमाज्ञया ।
तद्भोगान्ते पतेद्भूयः स जन्मानि भवार्णवे ॥
ये हताः पशवो लोकैरिह स्वार्थेषु कोविदैः ।
ते परत्र तु तान् हन्युस्तथा खड्‌गेन शङ्कर ! ॥
आत्मपुत्रकलत्रादिसुसम्पत्तिकृतेच्छया ।
यो दुरात्मा पशून् हन्यादात्मादीन् घातयेत् स तु ॥

जानन्ति नो वेदपुराणतत्त्वं
ये कर्म्मठाः पण्डितमानयुक्ताः ।
लोकाधमास्ते नरके पतन्ति
कुर्व्वन्ति मूर्खाः पशुघातनञ्चेत् ॥
येऽज्ञानिनो मन्दधियोऽज्ञतार्था
भवे पशुं घ्नन्ति न धर्म्मशास्त्रम् ।
जानन्ति नाकं नरकं न मुक्तिं
गच्छन्ति घोरं नरकं नरास्ते ॥
मुग्धा अकार्य्यां न विदन्ति शास्त्रा
न धर्म्ममार्गं परमार्थतत्त्वम् ।
पापं न पुण्यं पशुघातका ये
पूयोदवासो भवतीह तेषाम् ॥
जीवानुकम्पां न विदन्ति मूढ़ा
आत्मान्य येऽसत्पथिनो न धर्म्मम् ।
स्वार्त्ता भव प्राणिवधं न कुर्य्यु-
स्ते यान्ति मत्तराः खलु रौरवाख्यम् ॥

ततस्तु खलु जन्तूनां घातनं नो करिष्यति ।
शुद्धात्मा धर्म्मवान् ज्ञानी क्षणान्ते नैव मानवः ॥
यदीच्छेदात्मनः क्षेमं त्यक्त्वा ज्ञानं तदा नरः ।
जीवान् कानपि नो हन्यात् सङ्कटापन्न एव चेत् ॥
सम्पत्तौ च विपत्तौ वा परलोकेच्छुकः पुमान् ।
कदाचित् प्राणिनो हत्यां न कुर्य्यात्तत्त्ववित् सुधीः ॥
मानवो यः परत्रेह तर्त्तुमिच्छेत् सदाशिव ! ।
सर्व्वविष्णुमयत्वेन न कुर्य्यात् प्राणिनां वधम् ॥
वधाद्रक्षति यो मर्त्यो जीवान् तत्त्वज्ञधर्म्मवित् ।
किं पुण्यं तस्य वक्ष्येऽहं अज्ञाखं स तु रक्षति ॥
यो रक्षेत् घातनात् शम्भो ! जीवमात्रं दयापरः ।
कृष्णप्रियतमो नित्यं सर्व्वरक्षां करोति सः ॥
एकस्मिन् रक्षिते जीवे त्रैलोक्यं तेन रक्षितम् ॥
वधात् शङ्कर ! वै येन तस्माद्रक्षेन्न घातयेत् ॥”
तथा.—
“पशुहिंसा विधिर्यत्र पुराणे निगमे तथा ।
उक्तो रजस्तमोभ्यां स केवलं तमसापि वा ॥
नरकस्वर्गसेवार्थं संसाराय प्रवर्त्तितः ।
यतस्तत्कर्म्मभोगेन गमनागमनं भवेत् ॥
सत्वेन सात्त्वतग्रन्थे स विधिर्नैव शङ्कर ! ।
प्रवृत्तितो निवृत्तिस्तु यत्रापि सात्त्विकी क्रिया ।
एवं नानाविधं कर्म्म पशोरालभनादिकम् ।
कामाशयः फलाकाङ्क्षी त्वत्वाज्ञानेन मानवः ॥
पश्चाज्ज्ञानासिना छित्त्वा भ्रान्त्याशां तामसीं सदा ।
यमभीतिहरं भक्त्या यदि गोविन्दमाश्रयेत् ॥”
इति पाद्मोत्तरखण्डे । १०४।१०५ । अध्यायौ ॥

ब(व)लिः, स्त्री, ( बलति संवृणोतीति । बल संवरणे + इन् । ) जरया श्लथचर्म्म । तत्पर्य्यायः । चर्म्मतरङ्गः २ त्वगूर्म्मिः ३ त्वक्‌तरङ्गः ४ । इति राजनिर्घण्टः ॥ जठरावयवः । ( यथा, कुमारे । १ । ३६ ।
“मध्येन सा वेदिविलग्नमध्या
वलित्रयं चारु बभार बाला ॥” )
गृहदारुप्रभेदः । इति मेदिनी । ले, ५ ॥ गुदाङ्कुरः । यथा,—
“पश्चात्मा मारुतः पित्तं कफो गुदवलित्रयम् ।
सर्व्व एव प्रकुप्यन्ति गुदजानां समुद्भवे ॥
तस्मादर्शांसि दुःखानि बहुव्याधिकराणि च ।
सर्व्वदेहोपतापीनि प्रायः कृच्छ्रतमानि च ॥*॥
बाह्यायान्तु वलौ जातान्येकदोषोल्वणानि च ।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च ॥
द्वन्द्वजानि द्वितीयायां वलौ यान्याश्रितान्यपि ।
कृच्छ्रसाध्यानि तान्याहुः परिसंवत्सराणि च ॥
सहजानि त्रिदोषाणि यानि चाभ्यन्तरा वलिम् ।
जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्द्दिशेत् ॥”
इति माधवकरः ॥
( यथा च । “तत्र स्थूलान्त्रप्रतिबद्धमर्द्धपञ्चाङ्गुलं गुदमाहुस्तस्मिन् वलयस्तिस्रोऽध्यर्द्धाङ्गुलान्तरभूताः प्रवाहणी विसर्ज्जनी संवरणी चेति ।
चतुरङ्गुलायताः सर्व्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः ।
शङ्खावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः ।
गजतालुनिभाश्चापि वर्णतः संप्रकीर्त्तिताः ॥”
इति सुश्रुते निदानस्थाने द्वितीयेऽध्याये ॥
गन्धकः । तत्पर्य्यायो यथा,
“गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि ।
सौगन्धिकश्च कथितो बलिर्वेलरसापि च ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

बलिका, स्त्री, ( बलेव । बला + स्वार्थे कन् । टापि अत इत्वञ्च । ) अतिबला । इति राजनिर्घण्टः ॥

बलिदानं, क्ली ( बलेः पूजोपकरणस्य देवतोद्देशेन संकल्पितच्छागादेर्वा दानम् । ) श्रीकृष्णपार्षदेभ्यस्तन्निवेदितनैवेद्यांशप्रदानम् । यथा,—
अथ बलिदानम् ।
“ततो यवनिकां विद्वानपसार्य्य यथाविधि ।
विश्वक्‌सेनाय भगवन्नैवेद्यांशं निवेदयेत् ॥
यथा च पञ्चरात्रे श्रीनारदवचनम् ।